# २३. प्रतिष्ठानपत्तनकल्पः [ १ ] ।

जीयाज्जैत्रं पत्तनं पूतमेतद्गोदावर्याः श्री**प्रतिष्ठान**सञ्ज्ञम् ।
रत्नापीडं श्री**महाराष्ट्र**लक्ष्म्या रम्यं हर्म्यैर्नेत्रशैत्यैश्च चैत्यैः ॥ १ ॥
अष्टाषष्टिर्लौकिका अत्र तीर्था द्वापञ्चाशज्जज्ञिरे चात्र वीराः ।
पृथ्वीशानां न प्रवेशोऽत्र वीरक्षेत्रत्वेन प्रौढतेजोरवीणाम् ॥ २ ॥
निश्यतीत्य[1] पुटभेदनतोऽस्मात् षष्टियोजनमितं[2] किल वर्त्म ।
बोधनाय **भृगुकच्छ**मगच्छद्वाजिनो जिनपतिः कमठाङ्कः ॥ ३ ॥
अन्वित**त्रिनवतेर्नवशत्या** अत्ययेऽत्र शरदां जिनमोक्षात् ।
**कालको** व्यधित वार्षिकमार्यैः पर्व भाद्रपदशुक्लचतुर्थ्याम् ॥ ४ ॥
तत्तदायतनपङ्क्तिवीक्षणादत्र मुञ्चति जनो विचक्षणः ।
तत्क्षणात्सुरविमानधोरणि श्रीविलोकविषयं कुतूहलम् ॥ ५ ॥
[3]**शातवाहन**पुरस्सरा नृपाश्चित्रकारिचरिता इहाभवन् ।
दैवतैर्बहुविधैरधिष्ठिते चात्र सत्रसदनान्यनेकशः ॥ ६ ॥
**कपिला-त्रेय-बृहस्पति-पञ्चाला** इह महीभृदुपरोधात् ।
न्यस्तस्वचतुर्लक्षग्रन्थार्थं श्लोकमेकमप्रथयन् ॥ ७ ॥

स चायं श्लोकः—

जीर्णे भोजन**मात्रेयः, कपिलः** प्राणिनां दया ।
**बृहस्पति**रविश्वासः, **पञ्चालः** स्त्रीषु मार्दवम् ॥ ८ ॥
इह जयति दृशोरमृतच्छटा सुदृग्बर्हिणां पयोदघटा ।
जीवत्स्वामिप्रतिमा श्रीमन्**मुनिसुव्रत**स्य लेप्यमयी ॥ ९ ॥
वर्षाणामेकादशलक्षाण्यष्टायुतानि सार्धानि ।
अष्टौ शतानि षट्पञ्चाशानीत्यजनि कालोऽस्याः ॥ १० ॥
इह **सुव्रतजिन**चैत्ये यात्रामासूत्र्य विहितविविधमहाम् ।
भव्याश्चिन्वन्त्यैहिकपारत्रिकशर्मसम्पत्तीः ॥ ११ ॥
प्रासादेऽत्र श्रीजिनराजां चारु चकासति लेप्यमयानि ।
बिम्बान्यप्रतिबिम्बरुचीनि प्रीतिस्फीतिं वदति जनानाम् ॥ १२ ॥
**अम्बादेवी** क्षेत्राधिपतिर्यक्षाधिपतिश्चापि **कपर्दी** ।
एते चैत्यं समधिवसन्तः श्रीसङ्घस्य घ्नन्त्युपसर्गान् ॥ १३ ॥
अत्र चैत्यश्रियः शेखरं सुव्रतः प्राणिपूगोपकारैकबद्धव्रतः ।
वन्द्यमानक्रमः स्वर्गिवर्गैर्मुदा संपनीपद्यतां श्रेयसे वः सदा ॥ १४ ॥

श्री**प्रतिष्ठानतीर्थ**स्य श्री**जिनप्रभ**सूरयः । कल्पमेतं विरचयांबभूवुर्भूतये सताम् ॥ १४ ॥

॥ **श्रीप्रतिष्ठानपत्तनकल्पः** ॥

॥ ग्रं० १९, अ० १५ ॥

---

1 P विहायान्यत्र 'निश्यतीति'। 2 P विनाऽन्यत्र 'मितः'। 3 P सात°।